॥ वाल्मीकि रामायण॥

३ अरण्यकाण्ड

अध्याय ५४

सा तथोक्ता तु वैदेही निर्भया शोककर्षिता ।
तृणमन्तरतः कृत्वा रावणं प्रत्यभाषत ॥ १॥

राजा दशरथो नाम धर्मसेतुरिवाचलः ।
सत्यसन्धः परिज्ञातो यस्य पुत्रः स राघवः ॥ २॥

रामो नाम स धर्मात्मा त्रिषु लोकेषु विश्रुतः ।
दीर्घबाहुर्विशालाक्षो दैवतं स पतिर्मम ॥ ३॥

इक्ष्वाकूणां कुले जातः सिंहस्कन्धो महाद्युतिः ।
लक्ष्मणेन सह भ्रात्रा यस्ते प्राणां हरिष्यति ॥ ४॥

प्रत्यक्षं यद्यहं तस्य त्वया स्यां धर्षिता बलात् ।
शयिता त्वं हतः सङ्ख्ये जनस्थाने यथा खरः ॥ ५॥

य एते राक्षसाः प्रोक्ता घोररूपा महाबलाः ।
राघवे निर्विषाः सर्वे सुपर्णे पन्नगा यथा ॥ ६॥

तस्य ज्याविप्रमुक्तास्ते शराः काञ्चनभूषणाः ।
शरीरं विधमिष्यन्ति गङ्गाकूलमिवोर्मयः ॥ ७॥

असुरैर्वा सुरैर्वा त्वं यद्यवध्योऽसि रावण ।
उत्पाद्य सुमहद्वैरं जीवंस्तस्य न मोक्ष्यसे ॥ ८॥

स ते जीवितशेषस्य राघवोऽन्तकरो बली ।
पशोर्यूपगतस्येव जीवितं तव दुर्लभम् ॥ ९॥

यदि पश्येत्स रामस्त्वां रोषदीप्तेन चक्षुषा ।
रक्षस्त्वमद्य निर्दग्धो गच्छेः सद्यः पराभवम् ॥ १०॥

यश्चन्द्रं नभसो भूमौ पातयेन्नाशयेत वा ।
सागरं शोषयेद्वापि स सीतां मोचयेदिह ॥ ११॥

गतायुस्त्वं गतश्रीको गतसत्त्वो गतेन्द्रियः ।
लङ्का वैधव्यसंयुक्ता त्वत्कृतेन भविष्यति ॥ १२॥

न ते पापमिदं कर्म सुखोदर्कं भविष्यति ।
याहं नीता विना भावं पतिपार्श्वात्त्वया वनात् ॥ १३॥

स हि दैवतसंयुक्तो मम भर्ता महाद्युतिः ।
निर्भयो वीर्यमाश्रित्य शून्ये वसति दण्डके ॥ १४॥

स ते दर्पं बलं वीर्यमुत्सेकं च तथाविधम् ।
अपनेष्यति गात्रेभ्यः शरवर्षेण संयुगे ॥ १५॥

यदा विनाशो भूतानां दृश्यते कालचोदितः ।
तदा कार्ये प्रमाद्यन्ति नराः कालवशं गताः ॥ १६॥

मां प्रधृष्य स ते कालः प्राप्तोऽयं रक्षसाधम ।
आत्मनो राक्षसानां च वधायान्तःपुरस्य च ॥ १७॥

न शक्या यज्ञमध्यस्था वेदिः स्रुग्भाण्ड मण्डिता ।
द्विजातिमन्त्रसम्पूता चण्डालेनावमर्दितुम् ॥ १८॥

इदं शरीरं निःसंज्ञं बन्ध वा घातयस्व वा ।
नेदं शरीरं रक्ष्यं मे जीवितं वापि राक्षस ।
न हि शक्ष्याम्युपक्रोशं पृथिव्यां दातुमात्मनः ॥ १९॥

एवमुक्त्वा तु वैदेही क्रोद्धात्सुपरुषं वचः ।
रावणं मैथिली तत्र पुनर्नोवाच किं चन ॥ २०॥

सीताया वचनं श्रुत्वा परुषं रोमहर्षणम् ।
प्रत्युवाच ततः सीतां भयसन्दर्शनं वचः ॥ २१॥

शृणु मैथिलि मद्वाक्यं मासान्द्वादश भामिनि ।
कालेनानेन नाभ्येषि यदि मां चारुहासिनि ।
ततस्त्वां प्रातराशार्थं सूदाश्छेत्स्यन्ति लेशशः ॥ २२॥

इत्युक्त्वा परुषं वाक्यं रावणः शत्रुरावणः ।
राक्षसीश्च ततः क्रुद्ध इदं वचनमब्रवीत् ॥ २३॥

शीघ्रमेवं हि राक्षस्यो विकृता घोरदर्शनाः ।
दर्पमस्या विनेष्यन्तु मांसशोणितभोजनाः ॥ २४॥

वचनादेव तास्तस्य विकृता घोरदर्शनाः ।

कृतप्राञ्जलयो भूत्वा मैथिलीं पर्यवारयन् ॥ २५ ॥

स ताः प्रोवाच राजा तु रावणो घोरदर्शनः ।
प्रचाल्य चरणोत्कर्षैर्दारयन्निव मेदिनीम् ॥ २६ ॥

अशोकवनिकामध्ये मैथिली नीयताम् इति ।
तत्रेयं रक्ष्यतां गूढमुष्माभिः परिवारिता ॥ २७ ॥

तत्रैनां तर्जनैर्घोरैः पुनः सान्त्वैश्च मैथिलीम् ।
आनयध्वं वशं सर्वा वन्यां गजवधूम् इव ॥ २८ ॥

इति प्रतिसमादिष्टा राक्षस्यो रावणेन ताः ।
अशोकवनिकां जग्मुर्मैथिलीं परिगृह्य ताम् ॥ २९ ॥

सर्वकामफलैर्वृक्षैर्नानापुष्पफलैर्वृताम् ।
सर्वकालमदैश्चापि द्विजैः समुपसेविताम् ॥ ३० ॥

सा तु शोकपरीताङ्गी मैथिली जनकात्मजा ।
राक्षसी वशमापन्ना व्याघ्रीणां हरिणी यथा ॥ ३१ ॥

न विन्दते तत्र तु शर्म मैथिली
विरूपनेत्राभिरतीव तर्जिता ।
पतिं स्मरन्ती दयितं च देवरं
विचेतनाभूद्भयशोकपीडिता ॥ ३२ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com